# Natya Shastra Chapter 10

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૦

## Document Information

Text title : naaTyashaastra adhyaaya 10

File name : natya10.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : February 04, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૦

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ દશમોऽધ્યાયઃ ।

એવં પાદસ્ય જઙ્ઘાયા ઊર્વોઃ કટ્યાસ્તથૈવ ચ ।
સમાનકરણે ચેષ્ટા સા ચારીત્યભિધીયતે ॥ ૧॥

વિધાનોપગતાશ્ચાર્યો વ્યાયચ્છન્તે પરસ્પરમ્ ।
યસ્માદઙ્ગસમાયુક્તાસ્તસ્માદ્વ્યાયામ ઉચ્યતે ॥ ૨॥

એકપાદપ્રચારો યઃ સા ચારીત્યભિસંજ્ઞિતા ।
દ્વિપાદક્રમણં યત્તુ કરણં નામ તદ્ભવેત્ ॥ ૩॥

કરણાનાં સમાયોગઃ ખણ્ડમિત્યભિધીયતે ।
ખણ્ડૈસ્ત્રિભિશ્ચતુર્ભિર્વા સંયુક્તં મણ્ડલં ભવેત્ ॥ ૪॥

ચારીભિઃ પ્રસૃતં નૃત્તં ચારીભિશ્ચેષ્ટિતં તથા ।
ચારીભિઃ શસ્ત્રમોક્ષશ્ચ ચાર્યો યુદ્ધે ચ કીર્તિતાઃ ॥ ૫॥

યદેતત્પ્રસ્તુતં નાટ્યં તચ્ચારીષ્વેવ સંજ્ઞિતમ્ ।
નહિ ચાર્યા વિના કિઞ્ચિન્નાટ્યેऽઙ્ગં સમ્પ્રવર્તતે ॥ ૬॥

તસ્માચ્ચારીવિધાનસ્ય સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ।
યા યસ્મિંસ્તુ યથા યોજ્યા નૃત્તે યુદ્ધે ગતૌ તથા ॥ ૭॥

સમપાદા સ્થિતાવર્તા શકટાસ્યા તથૈવ ચ ।
અધ્યર્ધિકા ચાષગતિર્વિચ્યવા ચ તથાપરા ॥ ૮॥

એડકાક્રીડિતા બદ્ધા ઉરુદ્વૃત્તા તથાડ્ડિતા ।
ઉત્સ્પન્દિતા ચ જનિતા સ્યન્દિતા ચાપસ્યન્દિતા ॥ ૯॥

સમોત્સરિતમત્તલ્લી મત્તલ્લી ચેતિ ષોડશ ।

એતા ભૌમ્યઃ સ્મૃતાશ્ચાર્યઃ શૃણુતાકાશિકીઃ પુનઃ ॥ ૧૦॥

અતિક્રાન્તા હ્યપક્રાન્તા પાર્શ્વક્રાન્તા તથૈવ ચ ।
ઊર્ધ્વજાનુશ્ચ સૂચી ચ તથા નૂપુરપાદિકા ॥ ૧૧॥

ડોલપાદા તથાક્ષિપ્તા આવિદ્ધોદ્વૃત્તસંજ્ઞિતે ।
વિદ્યુદ્ભ્રાન્તા હ્યલાતા ચ ભુજઙ્ગત્રાસિતા તથા ॥ ૧૨॥

મૃગપ્લુતા ચ દણ્ડા ચ ભ્રમરી ચેતિ ષોડશ ।
આકાશિક્યઃ સ્મૃતા હ્યેતા લક્ષણં ચ નિબોધત ॥ ૧૩॥

પાદૈર્નિરન્તરકૃતૈસ્તથા સમનખૈરપિ ।
સમપાદા સ્મૃતા ચારી વિજ્ઞેયા સ્થાનસંશ્રયા ॥ ૧૪॥

ભૂમિઘૃષ્ટેન પાદેન કૃત્વાભ્યન્તરમણ્ડલમ્।
પુનરુત્સાદયેદન્યં સ્થિતાવર્ત્તા તુ સા સ્મૃતા ॥ ૧૫॥

નિષણ્ણાઙ્ગસ્તુ ચરણં પ્રસાર્ય તલસઞ્ચરમ્।
ઉદ્વાહિતમુરઃ કૃત્વા શકટાસ્યાં પ્રયોજયેત્ ॥ ૧૬॥

સવ્યસ્ય પૃષ્ઠતો વામશ્ચરણસ્તુ યદા ભવેત્ ।
તસ્યાપસર્પણં ચૈવ જ્ઞેયા સાધ્યર્ધિકા બુધૈઃ ॥ ૧૭॥

પાદઃ પ્રસારિતઃ સવ્યઃ પુનશ્ચૈવોપસર્પિતઃ ।
વામઃ સવ્યાપસર્પી ચ ચાષગત્યાં વિધીયતે ॥ ૧૮॥

વિચ્યવાત્ સમપાદાયા વિચ્યવાં સમ્પ્રયોજયેત્ ।
નિકુટ્ટયંસ્તલાગ્રેણ પાદસ્ય ધરણીતલમ્॥ ૧૯॥

તલસઞ્ચરપાદાભ્યામુત્પ્લુત્ય પતનં તુ યત્ ।
પર્યાયતશ્ચ ક્રિયતે એડકાક્રીડિતા તુ સા ॥ ૨૦॥

અન્યોન્યજઙ્ઘાસંવેગાત્ કૃત્વા તુ સ્વસ્તિકં તતઃ ।
ઊરુભ્યામ્ વલનં યસ્માત્ સા બદ્ધા ચાર્યુદાહૃતા ॥ ૨૧॥

તલસઞ્ચરપાદસ્ય પાર્ષ્ણિર્બાહ્યોન્મુખી યદા ।
જઙ્ઘાઞ્ચિતા તથોદ્વૃત્તા ઊરુદ્વૃત્તેતિ સા સ્મૃતા ॥ ૨૨॥

અગ્રતઃ પૃષ્ઠતો વાપિ પાદસ્તુ તલસઞ્ચરઃ ।
દ્વિતીયપાદો નિર્ઘૃષ્ટઃ યસ્યાં સ્યાદડ્ડિતા તુ સા॥ ૨૩॥

શનૈઃ પાદો નિવર્તેત બાહ્યેનાભ્યન્તરેણ ચ ।
યદ્રેચકાનુસારેણ સા ચાર્યુત્સ્યન્દિતા સ્મૃતા ॥ ૨૪॥

મુષ્ટિહસ્તશ્ચ વક્ષઃસ્થઃ કરોऽન્યશ્ચ પ્રવર્તિતઃ ।
તલસઞ્ચરપાદશ્ચ જનિતા ચાર્યુદાહૃતા ॥ ૨૫॥

પઞ્ચતાલાન્તરં પાદં પ્રસાર્ય સ્યન્દિતાં ન્યસેત્ ।
દ્વિતીયેન તુ પાદેન તથાપસ્યન્દિતામપિ ॥ ૨૬॥

તલસઞ્ચરપાદાભ્યામ્ ઘૂર્ણમાનોપસર્પણૈઃ ।
સમોત્સરિતમત્તલ્લી વ્યાયામે સમુદાહૃતા ॥ ૨૭॥

ઉભાભ્યામપિ પાદાભ્યાં ઘૂર્ણમાનોપસર્પણૈઃ ।
ઉદ્વેષ્ટિતાપવિદ્ધૈશ્ચ હસ્તૈર્મત્તલ્લ્યુદાહૃતા ॥ ૨૮॥

એતા ભૌમ્યઃ સ્મૃતાશ્ચાર્યો નિયુદ્ધકરણાશ્રયાઃ ।
આકાશકીનાં ચારીણાં સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ॥ ૨૯॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય પુરતઃ સમ્પ્રસારયેત્ ।
ઉત્ક્ષિપ્ય પાતયેચ્ચૈનમતિક્રાન્તા તુ સા સ્મૃતા ॥ ૩૦॥

ઊરુભ્યાં વલનં કૃત્વા કુઞ્ચિતં પાદમુદ્ધરેત્ ।
પાર્શ્વે વિનિક્ષિપેચ્ચૈનમપક્રાન્તા તુ સા સ્મૃતા ॥ ૩૧॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય પાર્શ્વેનોત્પતનં ન્યસેત્ ।
ઉદ્ઘટ્ટિતેન પાદેન પાર્શ્વક્રાન્તા વિધીયતે ॥ ૩૨॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય જાનુસ્તનસમં ન્યસેત્ ।
દ્વિતીયં ચ ક્રમાત્ સ્તબ્ધમૂર્ધ્વજાનુઃ પ્રકીર્તિતા ॥ ૩૩॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય જાનૂર્ધ્વં સમ્પ્રસારયેત્ ।
પાતયેચ્ચાગ્રયોગેન સા સૂચી પરિકીર્તિતા ॥ ૩૪॥

પૃષ્ઠતો હ્યઞ્ચિતં કૃત્વા પાદમગ્રતલેન તુ ।
દ્રુતં નિર્ઘાતયેદ્ભૂમૌ ચારી નૂપુરપાદિકા ॥ ૩૫॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય પાર્શ્વાત્પાર્શ્વં તુ દોલયેત્ ।
પાતયેદઞ્ચિતં ચૈવં દોલપાદા તુ સા સ્મૃતા ॥ ૩૬॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય આક્ષિપ્ય ત્વઞ્ચિતં ન્યસેત્ ।
જઙ્ઘાસ્વસ્તિકસંયુક્તા ચાક્ષિપ્તા નામ સા સ્મૃતા ॥ ૩૭॥

સ્વસ્તિકસ્યાગ્રતઃ પાદઃ કુઞ્ચિતસ્તુ પ્રસારિતઃ ।
નિપતેદઞ્ચિતાવિદ્ધ આવિદ્ધા નામ સા સ્મૃતા ॥ ૩૮॥

પાદમાવિદ્ધમાવેષ્ટ્ય સમુત્ક્ષિપ્ય નિપાતયેત્ ।
પરિવૃત્ત્ય દ્વિતીયં ચ સોદ્વૃત્તા ચાર્યુદાહૃતા ॥ ૩૯॥

પૃષ્ઠતો વલિતં પાદં શિરોઘૃષ્ટં પ્રસારયેત્ ।
સર્વતો મણ્ડલાવિદ્ધં વિદ્યુદ્ભ્રાન્તા તુ સા સ્મૃતા ॥ ૪૦॥

પૃષ્ઠઃ પ્રસારિતઃ પાદો વલિતોઽભ્યન્તરીકૃતઃ ।
પાર્ષ્ણિપ્રપતિતશ્ચૈવ હ્યલાતા સમ્પ્રકીર્તિતા ॥ ૪૧॥

કુઞ્ચિતં પાદમુત્ક્ષિપ્ય ત્ર્યશ્રમૂરું વિવર્તયેત્ ।
કટિજાનુવિવર્તાચ્ચ ભુજઙ્ગત્રાસિતા ભવેત્ ॥ ૪૨॥

અતિક્રાન્તક્રમં કૃત્વા સમુત્પ્લુત્ય નિપાતયેત્ ।
જઙ્ઘાઞ્ચિતોપરિક્ષિપ્તા સા જ્ઞેયા હરિણપ્લુતા ॥ ૪૩॥

નૂપુરં ચરણં કૃત્વા પુરતઃ સમ્પ્રસારયેત્ ।
ક્ષિપ્રમાવિદ્ધકરણં દણ્ડપાદા તુ સા સ્મૃતા ॥ ૪૪॥

અતિક્રાન્તક્રમં કૃત્વા ત્રિકં તુ પરિવર્તયેત્ ।
દ્વિતીયપાદભ્રમણાત્તલેન ભ્રમરી સ્મૃતા ॥ ૪૫॥

આકાશિક્યઃ સ્મૃતા હ્યેતા લલિતાઙ્ગક્રિયાત્મકાઃ ।
ધનુર્વજ્રાસિશસ્ત્રાણાં પ્રયોક્તવ્યા પ્રયોક્તૃભિઃ ॥ ૪૬॥

અગ્રગૌ પૃષ્ઠગૌ વાપિ હ્યનુગૌ ચાપિ યોગતઃ ।
પાદયોસ્તુ દ્વિજા હસ્તૌ કર્તવ્યૌ નાટ્યયોક્તૃભિઃ ॥ ૪૭॥

યતઃ પાદસ્તતો હસ્તો યતો હસ્તસ્તતસ્ત્રિકમ્ ।
પાદસ્ય નિર્ગમં જ્ઞાત્વા તથોપાઙ્ગાનિ યોજયેત્ ॥ ૪૮॥

પાદચાર્યાં યથા પાદો ધરણીમેવ ગચ્છતિ ।
એવં હસ્તશ્ચરિત્વા તુ કટિદેશં સમાશ્રયેત્ ॥ ૪૯॥

એતાશ્ચાર્યો મયા પ્રોક્તા લલિતાઙ્ગક્રિયાત્મકાઃ ।
સ્થાનાન્યાસાં પ્રવક્ષ્યામિ સર્વશસ્ત્રવિમોક્ષણે ॥ ૫૦॥

વૈષ્ણવં સમપાદં ચ વૈશાખં મણ્ડલં તથા ।

પ્રત્યાલીઢં તથાલીઢં સ્થાનાન્યેતાનિ ષણ્ નૃણામ્ ॥ ૫૧॥

દ્વૌ તાલાવર્ધતાલશ્ચ પાદયોરન્તરં ભવેત્ ।
તયોઃ સમસ્થિતસ્ત્વેકઃ ત્ર્યશ્રઃ પક્ષસ્થિતોઽપરઃ ॥ ૫૨॥

કિઞ્ચિદઞ્ચિતજઙ્ઘં ચ સૌષ્ઠવાઙ્ગપુરસ્કૃતમ્ ।
વૈષ્ણવં સ્થાનમેતદ્ધિ વિષ્ણુરત્રાધિદૈવતમ્ ॥ ૫૩॥

સ્થાનેનાનેન કર્તવ્યઃ સંલ્લાપસ્તુ સ્વભાવજઃ ।
નાનાકાર્યાન્તરાપેતૈર્નૃભિરુત્તમમધ્યમૈઃ ॥ ૫૪॥

ચક્રસ્ય મોક્ષણે ચૈવ ધારણે ધનુષસ્તથા ।
ધૈર્યદાનાઙ્ગલીલાસુ તથા ક્રોધે પ્રયોજયેત્ ॥ ૫૫॥

ઇદમેવ વિપર્યસ્તં પ્રણયક્રોધ ઇષ્યતે ।
ઉપાલમ્ભકૃતે ચૈવ પ્રણયોદ્વેગયોસ્તથા ॥ ૫૬॥

શઙ્કાસૂયોગ્રતાચિન્તામતિસ્મૃતિષુ ચૈવ હિ ।
દૈન્યે ચપલતાયોગે ગર્વાભીષ્ટેષુ શક્તિષુ ॥ ૫૭॥

શૃઙ્ગારાદ્ભુતબીભત્સવીરપ્રાધાન્યયોજિતમ્ ।
સમપાદે સમૌ પાદૌ તાલમાત્રાન્તરસ્થિતૌ ॥ ૫૮॥

સ્વભાવસૌષ્ઠવોપેતૌ બ્રહ્મા ચાત્રાધિદૈવતમ્ ।
અનેન કાર્યં સ્થાનેન વિપ્રમઙ્ગલધારણમ્ ॥ ૫૯॥

રૂપણે પક્ષિણાં ચૈવ વરં કૌતુકમેવ ચ ।
સ્વસ્થાનં સ્યન્દનસ્થાનાં વિમાનસ્થાયિનામપિ ॥ ૬૦॥

લિઙ્ગસ્થાનાં વ્રતસ્થાનાં સ્થાનમેતત્તુ કારયેત્ ।
તાલાસ્ત્રયોઽર્ધતાલશ્ચ પાદયોરન્તરં ભવેત્ ॥ ૬૧॥

તાલાંસ્ત્રીનર્ધતાલાંશ્ચ નિષણ્ણોરું પ્રકલ્પયેત્ ।
ત્ર્યશ્રૌ વક્ષઃસ્થિતૌ ચૈવ તત્ર પાદો પ્રયોજયેત્ ॥ ૬૨॥

વૈશાખસ્થાનમેતદ્ધિ સ્કન્દશ્ચાત્રાધિદૈવતમ્ ।
સ્થાનેનાનેન કર્તવ્યમશ્વાનાં વાહનં બુધૈઃ ॥ ૬૩॥

વ્યાયામનિર્ગમશ્ચૈવ સ્થૂલપક્ષિનિરૂપણમ્ ।
શરાણાં ચ સમુત્ક્ષેપો વ્યાયામકરણે તથા ॥ ૬૪॥

રેચકેષુ ચ કર્તવ્યમિદમેવ પ્રયોક્તૃભિઃ ।
ઐન્દ્રે તુ મણ્ડલે પાદૌ ચતુસ્તાલાન્તરસ્થિતૌ ॥ ૬૫॥

ત્ર્યશ્રૌ પક્ષઃસ્થિતૌ ચૈવ કટિજાનૂ સમૌ તથા ।
ધનુર્વજ્રાસિશસ્ત્રાણિ મણ્ડલેન પ્રયોજયેત્ ॥ ૬૬॥

વાહનં કુઞ્જરાણાં તુ સ્થૂલપક્ષિનિરૂપણમ્ ।
અસ્યૈવ દક્ષિણં પાદં પઞ્ચ તાલાન્ પ્રસાર્ય તુ ॥ ૬૭॥

આલીઢં સ્થાનકં કુર્યાદ્ રુદ્રશ્ચાત્રાધિદૈવતમ્ ।
અનેન કાર્યં સ્થાનેન વીરરૌદ્રકૃતં તુ યત્ ॥ ૬૮॥

ઉત્તરોત્તરસઞ્જલ્પો રોષામર્ષકૃતસ્તુ યઃ ।
મલ્લાનાઞ્ચૈવ સમ્ફેટઃ શત્રૂણાં ચ નિરૂપણમ્ ॥ ૬૯॥

તથાભિદ્રવણં ચૈવ શસ્ત્રાણાં ચૈવ મોક્ષણમ્ ।
કુઞ્ચિતં દક્ષિણં કૃત્વા વામં પાદં પ્રસાર્ય ચ ॥ ૭૦॥

આલીઢપરિવર્તસ્તુ પ્રત્યાલીઢમિતિ સ્મૃતમ્ ।
આલીઢસંહિતં શસ્ત્રં પ્રત્યાલીઢેન મોક્ષયેત્ ॥ ૭૧॥

નાનાશસ્ત્રવિમોક્ષો હિ કાર્યોઽનેન પ્રયોક્તૃભિઃ ।
ન્યાયાઞ્ચૈવ હિ વિજ્ઞેયાશ્ચત્વારઃ શસ્ત્રમોક્ષણે ॥ ૭૨॥

ભારતઃ સાત્વતશ્ચૈવ વાર્ષગણ્યોઽથ કૈશિકઃ ।
ભારતે તુ કટીચ્છેદ્યં પાદચ્છેદ્યં તુ સાત્વતે ॥ ૭૩॥

વક્ષસો વાર્ષગણ્યે તુ શિરશ્છેદ્યન્તુ કૈશિકે ।
એભિઃ પ્રયોક્તૃભિર્ન્યાયૈર્નાનાચારીસમુત્થિતૈઃ ॥ ૭૪॥

પ્રવિચાર્ય પ્રયોક્તવ્યં નાનાશસ્ત્રવિમોક્ષણે ।
ન્યાયાશ્રિતૈરઙ્ગહારૈર્ન્યાયાઞ્ચૈવ સમુત્થિતૈઃ ॥ ૭૫॥

યસ્માદ્ યુદ્ધાનિ વર્તન્તે તસ્માન્ન્યાયાઃ પ્રકીર્તિતાઃ ।
વામહસ્તે વિનિક્ષિપ્ય ખેટકં શસ્ત્રફેટકમ્ ॥ ૭૬॥

શસ્ત્રમાદાય હસ્તેન પ્રવિચારમથાચરેત્ ।
પ્રસાર્ય ચ કરૌ સમ્યક્ પુનરાક્ષિપ્ય ચૈવ હિ ॥ ૭૭॥

ખેટકં ભ્રામયેત્ પશ્ચાત્ પાર્શ્વાત્ પાર્શ્વમથાપિ ચ ।
શિરઃપરિગમશ્ચાપિ કાર્યઃ શસ્ત્રેણ યોક્તૃભિઃ ॥ ૭૮॥

કપોલસ્યાન્તરે વાપિ શસ્ત્રસ્યોદ્વેષ્ટનં તથા ।
પુનશ્ચ ખડ્ગહસ્તેન લલિતોદ્વેષ્ટિતેન ચ ॥ ૭૯॥

ખેટકેન ચ કર્તવ્યઃ શિરઃપરિગમો બુધૈઃ ।
એવં પ્રચારઃ કર્તવ્યો ભારતે શસ્ત્રમોક્ષણે ॥ ૮૦॥

સાત્વતે ચ પ્રવક્ષ્યામિ પ્રવિચારં યથાવિધિઃ ।
સ એવ પ્રવિચારસ્તુ ખડ્ગખેટકયોઃ સ્મૃતઃ ॥ ૮૧॥

કેવલં પૃષ્ઠતઃ શસ્ત્રં કર્તવ્યં ખલુ સાત્વતે ।
ગતિશ્ચ વાર્ષગણ્યેઽપિ સાત્વતેન ક્રમેણ તુ ॥ ૮૨॥

શસ્ત્રખેટકયોશ્ચાપિ ભ્રમણં સંવિધીયતે ।
શિરઃ પરિગમસ્તદ્વચ્છસ્ત્રસ્યેહ ભવેત્તથા ॥ ૮૩॥

ઉરસ્યુદ્વેષ્ટનં કાર્યં શસ્ત્રસ્યાંશેઽથવા પુનઃ ।
ભારતે પ્રવિચારોઽયં કર્તવ્યઃ સ તુ કૈશિકે ॥ ૮૪॥

વિભ્રમય્ય તથા શસ્ત્રં કેવલં મૂર્ધ્નિ પાતયેત્ ।
પ્રવિચારા પ્રયોક્તવ્યા હ્યેવમેતેઽઙ્ગલીલયા ॥ ૮૫॥

ધનુર્વજ્રાસિશસ્ત્રાણાં પ્રયોક્તવ્યા વિમોક્ષણે ।
ન ભેદ્યં નાપિ તુ ચ્છેદ્યં ન ચાપિ રુધિરસ્રુતિઃ ॥ ૮૬॥

રઙ્ગે પ્રહરણે કાર્યો ન ચાપિ વ્યક્તઘાતનમ્ ।
સંજ્ઞામાત્રેણ કર્તવ્યં શસ્ત્રાણાં મોક્ષણં બુધૈઃ ॥ ૮૭॥

અથવાભિનયોપેતં કુર્યાચ્છેદ્યં વિધાનતઃ ।
અઙ્ગસૌષ્ઠવસંયુક્તૈરઙ્ગહારૈર્વિભૂષિતમ્ ॥ ૮૮॥

વ્યાયામં કારયેત્ સમ્યક્ લયતાલસમન્વિતમ્ ।
સૌષ્ઠવે હિ પ્રયત્નસ્તુ કાર્યો વ્યાયામસેવિભિઃ ॥ ૮૯॥

સૌષ્ઠવે લક્ષણં પ્રોક્તં વર્તનાક્રમયોજિતમ્ ।
શોભા સર્વૈવ નિત્યં હિ સૌષ્ઠવં સમુપાશ્રિતા ॥ ૯૦॥

અચઞ્ચલમકુબ્જં ચાસન્નગાત્રમથાપિ ચ ।
નાત્યુચ્ચં ચલપાદઞ્ચ સૌષ્ઠવાઙ્ગં પ્રયોજયેત્ ॥ ૯૧॥

કટી કર્ણસમા યત્ર કૂર્પરાંસશિરસ્તથા ।

સમુન્નતમુરશ્ચૈવ સૌષ્ઠવં નામ તદ્ભવેત્ ॥ ૯૨॥

નહિ સૌષ્ઠવહીનાઙ્ગઃ શોભતે નાટ્યનૃત્તયોઃ ।
અત્ર નિત્યં પ્રયત્નો હિ વિધેયો મધ્યમોત્તમૈઃ ॥ ૯૩॥

નાટ્યં નૃત્તં ચ સર્વં હિ સૌષ્ઠવે સમ્પ્રતિષ્ઠિતમ્ ।
કટીનામભિચરૌ હસ્તૌ વક્ષશ્ચૈવ સમુન્નતમ્ ॥ ૯૪॥

વૈષ્ણવં સ્થાનમિત્યઙ્ગં ચતુરશ્રમુદાહૃતમ્ ।
પરિમાર્જનમાદાનં સન્ધાનં મોક્ષણમ્ તથા ॥ ૯૫॥

ધનુષસ્તુ પ્રયોક્તવ્યં કરણં તુ ચતુર્વિધમ્ ।
સંમાર્જનં પરામર્ષમાદાનં ગ્રહણં ક્રિયા ॥ ૯૬॥

સન્ધાનં શરવિન્યાસો વિક્ષેપો મોક્ષણં ભવેત્ ।
તૈલાભ્યક્તેન ગાત્રેણ યવાગૂમૃદિતેન ચ ॥ ૯૭॥

વ્યાયામં કારયેત્ શ્રીમાન્ ભિત્તાવાકાલિકે તથા ।
યોગ્યાયાં માતૃકા ભિત્તિસ્તસ્માદ્ભિત્તિં સમાશ્રયેત્ ॥ ૯૮॥

ભિત્તૌ પ્રસારિતાઙ્ગન્તુ વ્યાયામં કારયેન્નરમ્ ।
બલાર્થં ચ નિષેવેત નસ્યં બસ્તિવિધિં તથા ॥ ૯૯॥

સ્નિગ્ધાન્યન્યાનિ ચ તથા રસકં પાનકં તથા ।
આહારેઽધિષ્ઠિતાઃ પ્રાણાઃ પ્રાણે યોગ્યાઃ પ્રતિષ્ઠિતાઃ ॥ ૧૦૦॥

તસ્માદ્યોગ્યાપ્રસિધ્યર્થમાહારે યત્નવાન્ ભવેત્ ।
અશુદ્ધકાયં પ્રક્લાન્તમતીવક્ષુત્પિપાસિતમ્ ॥ ૧૦૧॥

અતિપીતં તથા ભુક્તં વ્યાયામં નૈવ કારયેત્ ।
અચલૈર્મધુરૈર્ગાત્રૈશ્ચતુરશ્રેણ વક્ષસા ॥ ૧૦૨॥

વ્યાયામં કારયેદ્ધીમાન્ નરમઙ્ગક્રિયાત્મકમ્ ।
એવં વ્યાયામસંયોગે કાર્યશ્ચારીકૃતો વિધિઃ ॥ ૧૦૩॥

અત ઊર્ધ્વં પ્રવક્ષ્યામિ મણ્ડલાનાં વિકલ્પનમ્ ।

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે ચારીવિધાનો નામ દશમોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 10*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*